# (१) निघण्टुव्याख्यानप्रतिज्ञा

समाम्नायः समाम्नातः, स व्याख्यातव्यः । तमिमं समाम्नायं निघण्टव इत्याचक्षते । निघण्टवः कस्मान्निगमा इमे भवन्ति । छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः ।

# (२) निघण्टुनिर्वचनम्

ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः । अपि वाऽऽहननादेव स्युः, समाहता भवन्ति । यद्वा समाहृता भवन्ति ।

(१) नि+गम्+तुन्=निगन्तु>निघन्तु>निघन्टु>निघण्टु>निघण्टुः।

(२) सम्+आ+पठनार्थक हन्+तुन्=समाहन्तु>{सम्←→निर् “निरित्येष समित्येतस्य स्थाने युज्यते”(निरु.१२.७) इति}>निराहन्तु>निर्हन्तु>निहन्तु>निघन्तु>निघन्टु>निघण्टु>निघण्टुः।

(३) सम्+आ+हरणार्थक हृ+तुन्=समाहर्तु>निर्हर्तु>निघतु>निघ नुम् तु>निघन्तु>निघन्टु>निघण्टु>निघण्टुः।

# (३) पदानां चतुर्धा विभाजनम्

तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति ।

चतुर्ग्रहणमवधारणार्थम् । नैकं पदजातं यथार्थः पदमैन्द्राणामिति । नापि द्वे यथा सुबन्तं तिङन्तं च । नापि त्रीणि निपातोपसर्गाविकतः कृत्वा । नापि पञ्च षड्वा यथा गतिकर्मप्रवचनीयभेदेनेति ।

# (४) नामाख्यातयोर्लक्षणम्

तत्रैतन्नामाख्यातयोर्लक्षणं
प्रदिशन्ति — भावप्रधानमाख्यातं
सत्वप्रधानानि नामानि।

(१) क्रियावाचकमाख्यातं लिङ्गतो, न विशिष्यते । त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते ॥

(२) शब्देनोच्चरितेनेह द्रव्यं प्रतीयते । तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ।।
अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः । तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥

# (५) वाक्ये भावस्य प्राधान्यत्वम्

तद्यत्रोभे भावप्रधाने भवतः। पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् । मूर्तं सत्वभूतं सत्वनामभिर्व्रज्या पक्तिरिति ।

(१) क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव ।
क्रियाभिनिवृत्तिवशेन सिद्धः आख्यातशब्देन तमर्थमाहुः ॥

(२) क्रियाभिनिवृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात् ।
संख्याविभक्तिव्ययलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्यः ॥

# (६) सत्वभावयोः निरूपणम्

अद इति सत्वानामुपदेशः । गौरश्वः
पुरुषो हस्तीति । भवतीति भावस्य ।
आस्ते शेते व्रजति तिष्ठतीति ।

# (७) शब्दनित्यानित्यविचारः

(पूर्वपक्षः) – इन्द्रियनित्यं वचनमौदुम्बरायणः ।
तत्र चतुष्टयं नोपपद्यते । अयुगपदुत्पन्नानां वा
शब्दानामितरेतरोपदेशः । शास्त्रकृतो योगश्च ।
(सिद्धान्तपक्षः) – व्याप्तिमत्वात्तु शब्दस्य ।

# (८) शब्दानां व्यवहारः

अणीयत्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके ।
तेषां मनुष्यवद्देवताभिधानम् ।
पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे ।

# (९) षड्भावविकारनिरूपणम्

षड्भावविकारा भवन्तीति वार्ष्यायणिः- जायते, अस्ति, विपरिणमते, वर्द्धते, अपक्षीयते विनश्यतीति । जायते इति पूर्वभावस्यादिमाचष्टे, नापरभावमाचष्टे, न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्वस्यावधारणम् । विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम् । वर्द्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम् – वर्धते विजयेनेति वा वर्धते शरीरेणेति वा । अपक्षीयते इत्येतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति । विनाश एवापरभावस्तस्यादिमाचष्टे । अतोऽन्ये वे भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह । ते यथावचनमभ्यूहितव्याः ।

# (१०) उपसर्गलक्षननिरूपणम्

न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः ।
नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ।
उच्चावचाः पदार्था भवन्तीति गार्ग्यः । तद्य एषु
पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम् ।

# (११) उपसर्गाणामर्थनिरूपणम्

आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यं
प्रतीत्येतस्य प्रातिलोम्यमति सु इत्यभिपूजितार्थे
निर्दुरित्येतयोः प्रातिलोम्यं न्यवेति विनिग्रहार्थीया
उदित्येतयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य
प्रातिलोम्यमन्विति सादृश्यापरभावमपीति
संसर्गमुपेत्युपजनं परीति सर्वतोभावमधीत्युपरिभावमश्चैर्य
वैवमुच्चावचानर्थान्प्राहुस्त उपेक्षितव्याः ।